Shodhshauryam, International Scientific Refereed Research Journal
© 2022 SHISRRJ | Volume 5 | Issue 6 | ISSN : 2581- 6306

# संस्कृतशिक्षणे व्याकरणानुवादविधेः योगदानम्

## The Role of Grammar Translation Method in Sanskrit Teaching.

**डा. विश्ववजित् प्रामाणिकः**
अनौपचारिकसंस्कृतशिक्षकः, मुक्तस्वाध्यायपीठम्, केन्द्रीयसंस्कृतविश्वविद्यालयः, जनकपुरी, नवदेहली

**सारांशः-** संस्कृतशिक्षणे बहूनां विधीनाम् उपयोगः क्रियते। एतेषु विधिषु व्याकरणानुवादविधिः कश्चन विशेषः विधिः वर्तते। व्याकरणनियमान् आश्रित्य अनुवादपद्धत्या अत्र भाषाणां शिक्षणं दीयते। आदौ कश्चन अध्येता मातृभाषायां संस्कृतभाषायां वा विद्यमानस्य भागस्य अनुवादं करोति। अनुवादकरणसमये सः अध्येता आचार्यान् पृष्ट्वा अनुवाददोषान् दूरीकर्तुं व्याकरणस्य आश्रयं स्वीकरोति। व्याकरणस्य नियमानाम् आश्रयेण वाक्यानि शुद्धानि करोति। तदवसरे अध्येता व्याकरणाध्ययनमपि साधयति। एवम् उक्तां प्रक्रियाम् आदाय अयं विधिः कार्यं विधत्ते इति कारणात् अस्य विधेः नाम व्याकरणानुवादविधिः। वैदेशिकभाषाणाम् अध्यापनार्थम् अस्य विधेः आविष्कारः अभूत्। विशिष्य लैटिन, फ्रेन्च इत्यादयः भाषाः अनेन विधिना पाठ्यन्ते स्म। क्रमशः संस्कृताध्ययनमपि अनेन विधिना क्रियते। भण्डारकरवर्यः अस्य विधेः आवश्यकताम् अनुभूय प्रप्रथमम् आरब्धवान् इति कारणात् अस्य विधेः नाम भण्डारकरविधिः इत्यपि उच्यते। संस्कृतशिक्षणे महत् उपकरोति अयं विधिः।कश्चन मातृभाषाभाषी जनः यदि संस्कृताध्ययनं कर्तुं वाञ्छति तर्हि अनेन विधिना तत् साधयितुं शक्नोति। नूतनसंस्कृताध्येतारः अनेन विधिना बहुधा संस्कृताध्ययनार्थं प्रवर्तते। यद्यपि अत्र केवलं व्याकरणस्य अनुवादस्य च महत्त्वं दीयते, रसानुभूतिः न भवति, छात्रकेन्द्री वर्तते अयं विधिः तथापि क्रमशः सावकाशम् अनेन विधिना संस्कृताध्ययनं कार्यते चेत् संस्कृताध्ययनक्षेत्रे महान् विकासः भवितुम् अर्हति। एतद्विधिप्रयोगकारणात् अध्येता द्विधा लाभं प्राप्तुम् अर्हति। अध्येता अनुवादमपि शिक्षते पुनश्च व्याकरणस्य प्रयोगान् सूत्राणां कण्ठस्थीकरणादिकमपि जानाति। एवं वर्तते संस्कृतव्याकरणानुवादविधिः।

**मुख्यभूतशब्दाः**– व्याकरणम्, अनुवादः, विधिः, भण्डारकरविधिः, संस्कृतशिक्षणम्

---

**उपोद्घातः-** अधिगमकारणीभूतं सहायकम् अभिवर्धकञ्चशिक्षणं सार्थकशिक्षणम् उच्यते। योजनापुरस्सरं रोचकं सक्रमञ्च सार्थकशिक्षणं नूनं प्रत्येकस्मिन् अध्येतरि सुष्ठुअधिगमं जनयेत्। यथाप्रत्येकमपि सार्थकशिक्षणं सुशिक्षणं वा विध्याश्रितं सत् कक्षासु सम्प्रवर्तेत।तस्मात् शिक्षणे विविधविधयः परिकल्पिताः सुचिन्तिताः प्रयुक्ताः प्रवर्तिताः प्रवर्धिताश्च सन्ति।विविधेऽस्मिन् शिक्षणप्रकरणे विधयःशिक्षणप्रकृतिम् अनुसृत्य परिवर्तन्ते। यथा शिक्षणविषयः तथा शिक्षणविधिः। सम्प्रति शिक्षाक्षेत्रे विविधशिक्षणप्रविधीनाम् उपयोगः जायमानः अस्ति, येषां प्रयोगेण प्रत्येकमपि शिक्षणं रोचकं प्रभावपूर्णं च भवितुम् अर्हति। अनेन शिक्षणे सजीवता आयाति, वैविध्यं दृश्यते, रोचकता जायते,

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

शिक्षणं प्रभावि च भवति। कारणम् शिक्षका: एषां शिक्षणविधीनां प्रयोगेण विषयान् उत्तमशैल्या उपस्थापयितुं प्रभवन्ति। आवश्यकतादृष्ट्या शिक्षणविधि: क्रमश: विकासं प्राप्नोति। अष्टादशशतकात् आरभ्य भारतीयशिक्षणव्यवस्थायां किञ्चन महत् युगोपकारि परिवर्तनं समभूत्।

अष्टादशशतकात् पूर्वं भारते शिक्षणं गुरुकुलव्यवस्थया प्रचलति स्म।तत्र गुरुशिष्यपरम्परा प्रधाना आसीत्। शिष्या: गृहं परित्यज्य गुरुकुले गुरूणां समीपे उषित्वा साक्षात् गुरुमुखात् विषयान् श्रुत्वा कण्ठस्थीकरणमाध्यमेन शिक्षां लभन्ते स्म।गुरुकुलेषु वेदवेदाङ्गादीनाम् अध्ययनं कार्यते स्म। तदा प्राचीनभारते विद्याध्ययनमेव श्रेष्ठं कर्म इति सर्वे जना: मन्वते स्म। प्राचीनशिक्षापरम्परायां समाजे गुरो: स्थानं सर्वोपरि भवति स्म। किन्तु वर्तमानशिक्षा लार्डमेकालेद्वारा भारते प्रतिष्ठापिता। पाश्चात्त्यशिक्षाप्रणाल्या: आधारेण आधुनिकी शिक्षा अग्रे प्रासरत्। लोककल्याणी शिक्षा आत्मकल्याणी अभूत्। साक्षरता, उपाधिप्राप्ति:, परीक्षापरिणाम:, धर्मनिरपेक्षता, संस्थागतयोजनानां क्रियान्वयनम्, उद्योगप्राप्ति: इत्यादीनि आधुनिकशिक्षाप्रणाल्या: उद्देश्यानि अभूवन्। नूतनविधित्वेन अष्टादशशतके यूरोपादिदेशेषु विदेशीयभाषाणाम् अध्यापनाय नवीना काचित् पद्धति: आरब्धा। संस्कृतशिक्षणविधिषु परम्परागतविधि:, कथाकथनविधि:, अनुवादविधि:, पाठ्यपुस्तकविधि:, प्रत्यक्षविधि:, व्याख्याविधि:, हरबार्टीयविधि:, भाषाप्रयोगशालाविधिश्चेति विशिष्टतां भजन्ते।एतेषु शिक्षणविधिषु कश्चन प्राचीन: सर्वजनप्रिय: विधिरयं वर्तते व्याकणानुवादविधि: इति। व्याकरणम् आश्रित्य अनुवादपरम्परया य: विधि: प्रयुज्यते, स: असौ व्याकरणानुविधिरुच्यते।व्याकरणानुवादविधिरिति शब्दे विद्यमानानि त्रीणि अपि पदानि विशिष्टतां भजन्ते। क्रमश: एकैकं पुरस्कृत्य सविस्तरम् उपस्थाप्यते।

**व्याकरणम्**–व्याक्रियन्ते व्युत्पाद्यन्ते असाधुशब्देभ्य: साधुशब्दा: इति व्याकरणम्। पुनश्च व्याक्रियन्ते व्युत्पाद्यन्ते प्रकृतिप्रत्ययादिविभागेन शब्दा अनेन इति व्याकरणम् इत्यपि सिद्धि: जायते। पाणिनीयशिक्षायां व्याकरणं वेदपुरुषस्य मुखं वर्तते इति उक्तम्–“मुखं व्याकरणं स्मृतम्”[1]।

आङ्गलभाषायां Grammar इति उच्यते। अयं Grammar इति शब्द: Grammatike Techne इति ग्रीक्भाषापदात् निष्पन्न:। अस्यार्थ: भवति The art of Letters. अर्थात् अक्षराणां कला। कश्चन विद्वान् कथयति यत्Grammar is a set of rules and regulations which controls and teaches us the correct use of the language. इति।व्याकरणविषये पुन: उच्यते– Grammar is a part of language study that pertains to the different classes of words, their relations to one another, and their functions in sentences.[2]

1.पाणिनीयशिक्षा, 42 ‘छन्द: पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते।।
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।
तस्मात् स्वाङ्गमधीत्यैव ब्रह्मलोके महीयते।।

2.Dictionary of Education. P-264

व्याकरणं नाम मानवाभिव्यक्तिशुद्धीकरणविधि:। वि आङ् इति उपसर्गपूर्वकात् डुकृञ् करणे इति धातो: ल्युट्प्रत्यये कृते सति व्याकरणपदं निष्पन्नम्।प्रकृतिप्रत्ययविभागपूर्वकशब्दव्युत्पत्त्याधायकं शास्त्रं व्याकरणम्। प्रत्येकं भाषाया: साधुत्वासाधुत्वपरिज्ञानं व्याकरणेनैव क्रियते। व्याकरणम् आधारं कृत्वा प्रत्येकं भाषा जायते, जीवति, समभिवर्धते च। व्याकरणं भाषाया: रक्षणं करोति। यदि कस्याश्चित् भाषाया: व्याकरणं न स्यात्, तर्हि सा भाषा चिरं न जीवेत्। लोक: तस्यां भाषायां स्वेच्छया प्रतिक्षणं परिवर्तनानि साधयिष्यति, तस्मात् सा भाषा प्रतिक्षणं परिवर्तमाना सती विविधताम् उपगम्य अवैज्ञानिकतां प्राप्स्यति। व्याकरणेन भाषा व्यवस्थिता जायते। व्याकरणशिक्षणाभावे रचनाया: अनुवादस्य च शिक्षा अपूर्णा।व्याकरणे सन्धिसमासकारकप्रत्ययादय: भवन्ति। शब्दसंरचनाया: वाक्यसंरचनाया: आधार: व्याकरणमेव भवति।व्याकरणं शब्दजनकं सत् नवनवशब्दान् जनयति।भाषाविज्ञानेन सह सम्पृक्तं भवति व्याकरणम्।भाषाशिक्षणक्षेत्रे व्याकरणस्य सम्यक् अध्ययनं तथा अध्यापनम् अतीतकालात् किञ्चन विशिष्टं स्थानं भजते। संस्कृतव्याकरणस्य व्यवस्थितरूपेण निर्माणस्य श्रेय: सततं पाणिनिं प्रति गच्छति।

**अनुवाद:-** विचाराभिव्यक्ते: माध्यम: भवति भाषा। प्रत्येकमपि शिशु: संवर्धनकालत: परित: विद्यमानजनेभ्य: श्रावं श्रावम् आदौ मातृभाषाया: श्रवणं करोति, मातृभाषाज्ञानं च प्राप्नोति। तदनन्तरं यथा यथा तस्मिन् ज्यैष्ठत्वम् आयाति, तथा तथा स: अन्यभाषा: शृणोति, अन्यभाषाणाम् आवश्यकतां च अनुभवति। एकस्यां भाषायां विद्यमानभावानाम् अन्यभाषया रूपान्तरणम् अनुवाद: उच्यते। अनुवादस्य इयं प्रक्रिया नूतनभाषाज्ञानप्राप्तये सयाहिका भवति। निष्कर्षत: मातृभाषाम् अतिरिच्य अन्यभाषाशिक्षणे अनुवादस्य अत्यधिकं महत्त्वं वर्तते। वस्तुत: कस्यापि नवीनभाषाया: ज्ञानार्थं अनुवादप्रक्रियावलम्बनं ब्रह्मास्त्रम् इति कथनेनापि अतिशयोक्ति: न भवति। अनुवाद: एव तादृश: माध्यम: वर्तते, यत्र नवीनभाषाया: ज्ञानं सरलतया, शीघ्रतया, रोचकतया वा साधयितुं शक्यते।अन्यभाषाशिक्षणे अनुवादस्य माध्यमेन विषयज्ञानं तथा विचाराणाम् अवगमनं सम्भवति।कस्याञ्चित् भाषायां विद्यमानविद्वत्तता अन्येभ्य: प्रदर्शनीया चेदपि अनुवादस्य आवश्यकता भवति।अस्य माध्यमेन साहित्ये विद्यमानं नवीनं ज्ञानं प्राप्यते। येन तद्भाषाया: शिक्षणम् अधिकं रोचकं प्रासङ्गिकं च भवति।विद्यार्थिन: अनुवादमाध्यमेन तद्भाषाया: साहित्ये विद्यमानान् उत्कृष्टविचारान्, नीतिश्लोकानाम् उपदेशात्मकश्लोकानां च गूढभावांश्च अवगन्तुं शक्नुवन्ति।अनुवादमाध्यमेन भाषाया: वाक्यसंरचनावगमने सारल्यं भवति।

**अनुवादप्रकारा:**-विद्यमानेषु अनुवादप्रकारा:–

- **शब्दानुवाद:**– यस्मिन् अनुवादे प्रत्येकं शब्दस्य अनुवाद: क्रियते स: अनुवाद: शब्दानुवाद: उच्यते। शब्दानुवादे विद्यमानस्य शब्दस्य तथैव अनुवाद: क्रियते। अस्य अनुवादस्य कारणेन अनुवाद: नीरस: भवति। नामादिप्रसङ्गेषु शब्दानुवाद: युज्यते, किन्तु यत्र भाव: एव प्रधान: तत्र शब्दानुवाद: योग्य: न भवति।
- **भावानुवाद:**– भावानुवादस्य अर्थ: वर्तते यत् एकस्यां भाषायाम् अभिव्यक्तानां विचाराणाम् अन्यभाषायां संक्षेपेण कथनम्। अयं भावानुवाद: मर्मानुवाद: छायानुवाद: वा उच्यते। अस्मिन् अनुवादे

भावसाम्यता तिष्ठति, शब्दशैल्यादिविषये उपेक्षा भवति। भावानुवादं पठित्वा पाठका: रसानुभवं कुर्वन्ति। परं भावानुवादे बहुधा मूललेखकस्य लेखनपरिवर्तनं क्रियते।

- **तथ्यानुवाद:**- अस्मिन् अनुवादे एकस्यां भाषायां व्यक्ता: विचारा: अन्यस्यां भाषायाम् अनुकथनसमये शब्दश: कथनेन सह मूलभावस्य शैल्या: वा रक्षणं क्रियते। अनुवाद: तावान् स्वाभाविक: भवति येन लेखक: स्वयं तया भाषया रचितवान् स्यात्। एवम् एकस्यां भाषायाम् अभिव्यक्ता: विचारा:, भावा:, शब्दा:, शैल्य:, ध्वनय: इत्यादीनां यथायथं कथनं तथ्यानुवाद: उच्यते।

**व्याकरणशिक्षणस्य उद्देश्यानि-**

- व्याकरणशिक्षणेन अध्येतार: पदविज्ञानं ज्ञातुं प्रभवन्ति।
- व्याकरणशिक्षणेन अध्येतार: उच्चारणादिकं सम्यक् ज्ञातुं शक्नुवन्ति।
- शुद्धोच्चारणेन वर्णोच्चारणस्य भाषापरिमार्जनस्य मार्ग: प्रशस्त: भवति।
- शुद्धसंस्कृतशब्दोच्चारणे अन्यासां भाषाणां शब्दानाम् अवबोधने सौविध्यं प्राप्नोति।
- व्याकरणशिक्षणेन अध्येतार: भाषाविज्ञानम् अधिगच्छन्ति।
- अस्य शिक्षणेन छात्राणां स्मृतिविकास: बौद्धिकविकासश्च सञ्जायते।
- व्याकरणशिक्षणं सम्प्राप्य पदार्थावबोधने सौविध्यं प्राप्नोति।
- व्यवहारे भाषागतगुणदोषान् पृथक्कर्तुं योग्यताप्रदानं भवति।
- व्याकरणतत्त्वानि व्यवहारे प्रयोक्तुं क्षमतोत्पादनं जायते।
- ध्वनितत्त्वानां परिचयं प्राप्नोति।

**अनुवादशिक्षणस्य उद्देश्यानि-**

- शब्दकोषस्य योग्यतावृद्धि: जायते।
- भाषाद्वये विद्यमानशब्दानाम् अथवा विविधभाषासाहित्यानां तुलनात्मकाध्ययनसामर्थ्यं वर्धते।
- सरलभाषया अनुवादस्य सामर्थ्यवृद्धि: जायते।
- लक्ष्यभाषात: मातृभाषायाम्, मातृभाषात: लक्ष्यभाषायाम् अनुवादसामर्थ्यं जायते।
- मौखिकाभिव्यक्ते: योग्यतावृद्धि: भवति।
- तद्भाषया लेखनसामर्थ्यं वर्धते।
- नवीनपदानाम् अर्थबोधविषये भाषाशैलीविषये च योग्यता विकासं प्राप्नोति।
- गद्यपद्यादीनां मातृभाषाणुवादयोग्यतावृद्धि: जायते।
- विचारादानप्रदानविषये योग्यता विकासं प्राप्नोति।
- साहित्यानुवादं विधाय तादृशानां साहित्यानां श्रीवृद्धि: भवितुम् अर्हति।
- अनुवादाभ्यासेन सर्वप्रकाराणां रचनायोग्यता विकासं प्राप्नोति।

**संस्कृतशिक्षणे अनुवादविधेः आवश्यकता-** शिक्षणे मातृभाषा अत्यन्तम् उपकरोति। तस्मात् कस्यचित् विषयस्य अध्यापनं यदि मातृभाषया क्रियेत, तर्हि विद्यार्थिनाम् अवगमने अत्यन्तं सारल्यं भवति। कारणं मातृभाषाशिक्षणेन सरलता, सुगमता, स्पष्टता च भवति। तस्मात् मातृभाषया अनुवादमाध्यमेन विषयाः अध्यापयितुं शक्याः। तद्भाषायाः पदानां वाक्यानाम् अनुच्छेदानां च अक्षरशः मातृभाषया अनुकथनम् एव अनुवादः उच्यते। सर्वविधभाषाणां शिक्षणाय अनुवादविधेः प्रयोगः कर्तुं शक्यः। शास्त्रीयभाषाशिक्षणे अपि अस्य विधेः प्रयोगः स्वीक्रियते। लेटिन, ग्रीक, अंग्रेजी, फ्रेन्च, जर्मन इत्यादिभिः भाषाभिः सह संस्कृतभाषायाः अध्यापने अपि अनुवादविधिः आश्रीयते।

सर्वदा अनुवादस्य द्विधा मार्गः भवति। मातृभाषातः लक्ष्यभाषां प्रति अनुवादः, अथवा लक्ष्यभाषातः मातृभाषां प्रति अनुवादः। संस्कृतशिक्षणे आदौ शिक्षकः संस्कृतवाक्यानांसंस्कृतानुच्छेदानां वा चयनं कुरुते, तदनु आदर्शपाठस्य उपस्थापनं क्रियते। तदा तत्र विद्यमानानां कठिनदुर्बोधपदानां व्याख्यानं करोति तथा च तेषां पदानां स्पष्टार्थं सूचयति। तदा कठिनपदानाम् अवगमनाय शब्दकोशादिदर्शनविषये अभ्यासः कार्यते। तदनु अनुवादार्थं छात्राः सूच्यन्ते। अनुवादानन्तरं छात्राः स्वयं कृतानुवादं क्रमशः श्रावयन्ति। आवश्यकतायां सत्याम् अनुवादे अशुद्धे सञ्जाते शिक्षकः योग्यमार्गदर्शनं विदधाति। एवं क्रमेण छात्रः अनुवादकलायां नैपुण्यं प्राप्नोति।

**अनुवादविधेः गुणाः-**

- एषः विधिः मनोवैज्ञानिकसिद्धान्तानाम् उपरि आश्रितः अस्ति।
- अयं विधिः स्वतन्त्राध्ययनार्थं छात्रान् प्रेरयति।
- छात्राः मातृभाषामाध्यमेन अन्यविषयस्य अन्यभाषायाः विषये अभ्यासं कर्तुं शक्नुवन्ति।
- तद्भाषायाः वाक्यसंरचनापद्धतिः अत्र दृश्यते।
- अस्मिन् विधौ अल्पसमयः आवश्यकः भवति।

**भाण्डारकरविधिः**-यूरोपादिदेशेषु विदेशीयभाषाणाम् अध्यापनाय विद्यमानं विधिम् आश्रित्य डा. रामकृष्णगोपालभण्डारकरमहोदयः'मार्गोपदेशिका', 'संस्कृतमन्दिरान्तः प्रवेशिका' इति ग्रन्थद्वयं व्यरचयत्।एतौ उभावपि ग्रन्थौ भाण्डारकरवर्येण आङ्गलभाषया लिखितौ। अतिसरलतया संस्कृतव्याकरणं संस्कृतभाषां चाध्येतुम् उपकुरुतः एतौ ग्रन्थौ। डा. रामगोपालभण्डाकरवर्यः विद्यालयेषु संस्कृताध्ययनं मनसि निधाय पुनश्च संस्कृतं सर्वेभ्यः विद्यार्थिभ्यः इत्यपि संकल्पम् उररीकृत्य अस्य विधेः प्रारम्भम् अकरोत्। अयं विधिः भाण्डारकरवर्येण प्रथमवारम्आरब्धः इत्येतस्मात् अस्य विधेः नाम भण्डारकरविधिः इति अभवत्। असौ एव विधिः व्याकरणानुवादविधिरिति नाम्ना अपि प्रथते।महाविद्यालयादिषु अयं विधिः संस्कृतभाषाशिक्षणे अत्यन्तम् उपकारकः वर्तते। आबालवृद्धेभ्यः सामान्यज्ञानवर्धनार्थम्इतरभाषामाध्यमेन संस्कृताध्यापने अभिरुचिं जनयति अयं विधिः। अस्य विधेः कारणेन कण्ठस्थीकरणं दूरङ्गच्छति, स्वयं शक्तेः जागरणं भवति, अनुभवज्ञानसम्पादनं भवति। वास्तविकतः अस्मिन् विधौ व्याकरणं पुनश्च अनुवादः इत्युभयमपि सम्मिलितरूपेण आनीतौ। अस्मिन् विधौ व्याकरणस्य ज्ञानम् अनुवादमाध्यमेन दीयते पुनश्च विद्यार्थिनां बोधशक्तेः जागरणं विधाय अभ्यासमाध्यमेन व्याकरणज्ञानं कार्यते।

व्याकरणानुवादविधिविषये भण्डारकरवर्यस्य अभिमतानुगुणम्अद्यत्वे प्रायश: सर्वे अपि छात्रा: मातृभाषायां प्रावीण्यं भजन्ते। मातृभाषायां पूर्णाधिकार: भवति इत्येतस्मात् सरलात् कठिनं प्रति, ज्ञातात् अज्ञातं प्रति इत्यादिशिक्षणसूत्राणि अनुसृत्य मनोवैज्ञानिकपद्धत्या संस्कृतभाषाया: ज्ञानं मातृभाषया कारयितुं शक्यते। तदा संस्कृताध्ययने जना: उत्साहं नूनं प्राप्स्यन्ति। अत्र मातृभाषया सह तौलनिकाध्ययनं साधयन्त: संस्कृतभाषाया: अध्ययनमपि विधास्यन्ति। संस्कृतभाषाशिक्षणे अस्य विधे: प्रयोग: उपयोगाय भवितुम् अर्हति। संस्कृतभाषाया: ज्ञानार्जनम् अनेन विधिना सरलतापूर्वकं साधयितुं शक्यते। संस्कृतभाषायां पटुत्वं प्राप्तुं व्याकरणाध्ययनस्य महती आवश्यकता भवति। सरलोदाहरणै: इयं व्यवस्था यदि सरलतमा क्रियते, मातृभाषया संस्कृतभाषाया: स्वरूपस्य अवगमनं कारयिष्यते तदा अध्येतार: रुचिपूर्वकम् अध्ययनं कर्तुं शक्ष्यन्ति।

**व्याकरणानुवादविधे: प्रक्रिया-**लैटिनभाषाध्ययनार्थं व्याकरणानुवादविधि: उत्पन्न:। तदा लैटिनभाषाध्ययनार्थं सर्वे अपि इच्छन्ति स्म। सर्वकार:, शिक्षा, व्यवसाय: इत्यादि सर्वमपि लैटिन्भाषया प्रचलति स्म। तदा आधुनिकभाषा: सर्वा: अपि विद्यालयपाठ्यक्रमे आसन्। अयं विधि: 'क्लासिक मेथड' उच्यते। लैटिन तथा ग्रीकभाषाशिक्षणाय अयं विधि: औचित्यम् आवहति।विंशत्यां शताब्द्याम् वैदेशिकभाषाणाम् अध्ययनाय अस्य विधे: प्रयोग: क्रियते स्म। व्याकरणानुवादस्य कक्षा छात्राणां कृते मातृभाषया आयोज्यते।छात्रा: व्याकरणसम्बद्धान् नियमान् निगमनपद्धत्या पठन्ति। वाक्येषु व्याकरणाभ्यासद्वारा नियमानाम् अभ्यास:। अत्र सामग्रिकानुवादस्य अपेक्षया वाक्यानुवादस्य उपरि अधिकम् अवधानं क्रियते। यदा छात्र: अनुपलब्धे: सर्वाधिकोन्नतस्तरं प्राप्नोति, लक्ष्यभाषया पुनश्च लक्ष्यभाषा पुनश्च मूलभाषा इत्यनयो: द्वयो: मध्ये वाक्यानाम् अनुवादं विधाय तेषां नियमानां प्रवर्तनं क्रियते। अत्र ज्येष्ठच्छात्रा: सम्पूर्णपाठस्य शब्दश: अनुवादं कुर्वन्ति। अस्य विधे: लक्ष्यद्वयं वर्तते, अध्ययने अनुवादकरणे च छात्रस्य निर्माणम्, स्रोतभाषया लिखितस्य साहित्यस्य अग्रे नयनञ्च। प्रथमवारं लैटिनभाषाया: अध्यापनार्थम् अयं विधि: आविष्कृत:। शास्त्रीयग्रन्थानाम् अवसर: अनन्तरम् आयाति। इह अस्य विधे: सोपानानि प्रस्तूयन्ते-

1. मातृभाषात: लक्ष्यभाषां प्रति अथवा लक्ष्यभाषात: मातृभाषां प्रति अनुवादार्थं छात्रा: सूच्यन्ते।
2. अनुवादकाले व्याकरणनियमानाम् अनुसरणं क्रियते।
3. कृत: अनुवाद: प्रयोगार्थम् उपयुज्यते।

**संस्कृतशिक्षणे व्याकरणानुवादविधे: आवश्यकता-** मौखिकशैल्या प्रदीयमाना शिक्षा सम्प्रति महत् परिवर्तिता। मध्येकालं व्याख्यानशास्त्रादिमाध्यमेन अपि संस्कृतशिक्षणे किञ्चित् परिवर्तनम् अभूत्। किन्तु आङ्गलशासनात् परं प्राचीनभारतीयशिक्षाप्रणाल्यां महत् परिवर्तनम् अभूत्, आधुनिकशिक्षाप्रणाल्या: सूत्रपात: अपि अभूत्। यत्र विविधनवीनशिक्षणविधीनां प्रयोग: विहित:।संस्कृतभाषाशिक्षणे अनुवादस्य महत् महत्त्वं वर्तते, कारणं भारते सर्वे अपि शिक्षिता: एतां भाषां न जानन्ति। विद्यार्थिभ्य: एतस्या: भाषाया: पूर्वज्ञानं न भवति। अत: संस्कृतशिक्षणम् अनुवादमाध्यमेन अधिकोपयोगि वर्तते।विद्यालयादिषु संस्कृतभाषाशिक्षणे दौर्बल्यं प्रवर्तते। तस्मात् विद्यालयादिस्तरेषु प्रारम्भिकस्तरे बालकेभ्य: मातृभाषाया: समुचितं ज्ञानं येषाम् अस्ति, तेभ्य: संस्कृतशिक्षणानुभवमाध्यमेन संस्कृतभाषा पाठनीया।

**व्याकरणानुवादपद्धते: गुणा:-**

1. छात्रस्य अध्ययनक्षमता तावत् पर्यन्तं विकसिता स्यात्, येन छात्रा: लक्षितभाषाया: साहित्यं पठितुं शक्नुयु:।
2. छात्राणां सामान्यमानसिकम् अनुशासनं विकसितं स्यात्।
3. एषा पद्धति: वैज्ञानिकी वर्तते।
4. सर्वस्तरीयेभ्य: अध्येतृभ्य: अयं विधि: योग्य: वर्तते।
5. अस्यां पद्धतौ व्याकरणसूत्राणां कण्ठस्थीकरणस्य उपरि बहु बलं न दीयते, अपि तु साक्षात्कार्यसाधनस्य उपरि बलं दीयते। अत्र विचारशक्ते: प्रवर्धनं क्रियते। छात्रा: स्वयं सूत्रादिकण्ठस्थीकरणविषये पटुत्वं प्राप्नुवन्ति। तद्विषये अभ्यस्ता: अपि जायन्ते।
6. अस्यां पद्धतौ सर्वे अपि बाला: प्रौढा: कार्यं साधयितुं शक्नुवन्ति।
7. अस्यां पद्धतौ अल्पकालाभ्यन्तरे संस्कृतज्ञानं विकासं प्राप्नोति। आरम्भत: जना: शिक्ष्यमाणा: भवन्ति। अन्यभाषाज्ञानवन्त: छात्रा: आरम्भत: अनुवादमाध्यमेन संस्कृतभाषाज्ञानं प्राप्नुवन्ति।
8. व्याकरणसूत्राणाम् अध्ययनकारणत: अनुवादाभ्यासकारणत: च भाषा अत्र स्वाधीना तिष्ठति।
9. कस्यापि साहाय्यं विना अध्येता स्वयम् अधिगन्तुं शक्नोति।
10. सरलात् कठिनं प्रति, स्थूलात् सूक्ष्मं प्रति, ज्ञातात् अज्ञातं प्रति इत्यादिशिक्षणसिद्धान्तान् अनुसरति एष: विधि:।
11. शिक्षक: नूतनपदानां विषये साहाय्यम् आचरति। छात्रा: अस्मिन् क्रमे अत्यन्तं सक्रिया: तिष्ठन्ति।
12. छात्राणां शब्दसंग्रहविषये महत् धैर्यम् आयाति।

**व्याकरणानुवादपद्धते: दोषा:-**

1. एषा पद्धति: रुचिकरी न भवति।
2. अत्र व्याकरणस्य अनुवादस्य च महत्त्वं भवति, न तु भाषाया:।
3. एतत् शिक्षणं व्याकरणाश्रितं भवति। तस्मात् रसानुभूति: न जायेत।
4. अस्यां पद्धतौ गुरो: न किमपि विशेषमहत्त्वं भवति। गुरोर्मुखात् अध्येतार: पाठान् श्रोतुं न शक्नुवन्ति।
5. इयं पद्धति: नीरसा वर्तते।
6. अत्र भाषाया: वास्तविकं स्वरूपं न ज्ञायते।
7. श्रवणभाषणकौशलयो: अवकाश: नास्ति।
8. छात्रा: केवलम् एकभाषात: अन्यभाषां प्रति अनुवादं कर्तुं समर्था: भवन्ति।

**उपसंहृति:-** सहजतया संस्कृतभाषाशिक्षणाय व्याकरणानुवादविधि: अत्यन्तम् उपयोगी वर्तते। आदौ यूरोपदेशे ग्रीक, ल्यैटिन इत्यादिभाषा: पठितुम् अयं विधि: आविष्कृत:, तदनु नवदशशताब्दीत: क्रमश: आधुनिकभाषा: यथा फ्रेन्च, जर्मन, आङ्गलम् इत्यादिभाषा: पाठयितुम् अद्यापि अयं विधि: आश्रीयते।व्याकणानुवादमाध्यमेन

संस्कृतभाषाशिक्षणाय प्रयुक्तविधिषु भाण्डारकरवर्येण आरब्धः एषः व्याकणानुवादविधिः अत्यन्तं योग्यः उपकारकश्च वर्तते।अद्यत्वे प्रात्यक्षिकमाध्यमेन संस्कृताध्ययनार्थं कश्चन सुगमः मार्गः आविष्कृतः। तद्विषये महान्तः शोधाः अपि जायमानाः वर्तन्ते। एतादृशं पाठ्योपकरणादिसमन्वितं संस्कृतकक्षायां महान्तं प्रभावं जनयति। संस्कृतेतरे संस्कृतप्रियाः आदौ एतं विधिम् अनुसृत्य संस्कृताध्ययनार्थं प्रवर्तन्ते। व्याकरणं समाश्रित्य अनुवादद्वारा संस्कृतस्य शिक्षणे आदौ एव संस्कृतभाषायाः स्वरूपादिज्ञानं प्रत्येकमपि अध्येतुः जायते। अनेन विधिना संस्कृतभाषायाः अभ्यासपूर्वकं छात्राः क्रमशः संस्कृतभाषाविषये ज्ञानवान् भविष्यति। आदौ व्याकरणानुवादविधिना संस्कृतं पठितवन्तः अध्येतारः क्रमशः स्वयं संस्कृतकाव्यादिपठने नैपुण्यं प्राप्नुवन्ति, संस्कृतानुवादसंरचनायां प्रवृत्ताः भवन्ति।

**सन्दर्भग्रन्थसूची –**


1. पारीक, ओमप्रकाश. (2015).प्राचीन साहित्य में वर्णित विद्या अध्ययन पद्धति एवं आधुनिक शिक्षा. जयपुरः देवनागर प्रकाशन
2. भन्साली, आशा. (2004). संस्कृत शिक्षण के नवीन आयाम. जोधपुरः राजस्थानी ग्रन्थागार
3. सिंह, कर्ण. (1997). संस्कृत-शिक्षण.खीरी:गोविन्द प्रकाशन
4. शर्मा, कुलदीप. (2022). संस्कृतशिक्षकभूमिका.नवदेहली: केन्द्रीयसंस्कृतविश्वविद्यालयः
5. Sastri&Lahiri. (1956). A higher Sanskrit Grammar & Composition. Kolkata: The Dhaka Students Library.